वृद्धमनुः॥ मध्ये वा यदि वाप्यन्ते यत्र कन्यां रविर्व्रजेत्। पक्षः सकलः पूज्यः श्राद्धे तत्र विधीयते। अपमपन पक्षो महालयसंज्ञ
कः तदाह मनुः॥ नभः स्यस्यापरः पक्षो यत्र कन्यां व्रजेद्रविः। स महालयसंज्ञः स्यात् गजच्छायाकृतस्तथा। अस्य महालयस्य श्राद्धस्य फ
लमाह काष्र्णाजिनिः॥ पुत्रमायुस्तथारोग्यमैश्वर्यमतुलं तथा। प्राप्नोति पंचमे दत्वा श्राद्धं कामांश्च पुष्कलान्। श्राद्धाकरणे दोष
उक्तस्तेनैव। प्रेतार्ध्यं वै वहिं सति पंचमं यो व्यतिक्रमेत्। तस्मान्नातिक्रमे द्विद्वान् पंचमे पैतृकं विधिं नागरखंडे। आषाढ्याः पंचमे
पक्षे यः श्राद्धं न करिष्यति। शाकेनापि यदि क्रोपि सोन्यजलमुपैष्यति। ब्रह्मपुराणे॥ सूर्ये कन्यांगते कुर्याद्यः श्राद्धं यो न गृहाश्र
मी। धनं पुत्राः कुतस्तस्य पितृनिश्वासपीडया। प्रतिपदादिषु दर्शान्तासु तिथिषु दिने महालयश्राद्धकरणासमर्थं प्रति ब्रह्मपुरा
णे। अश्वयुक् कृष्णपक्षे च श्राद्धं कार्यं दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा। त्रिभागहीनं पक्षः त्रत्राद्यास्त्वतस्तिथयः स्त्वतु दशीवितिर्पंचहीनं तदुक्त्य
तस्य पक्षत्रिभागहीनता एवं दशम्यादिपक्षस्य त्रिभागता। अष्टम्यादिपक्षस्यार्धता। अष्टक्याएषु पंचम्यादिपक्षेषु चतुर्दशी
वर्जनस्य वक्ष्यमाणत्वात्। नित्यसम्भवनाच पितृथाप्यपरपक्षे श्राद्धं पितृभ्यो दत्त्वं पंचम्यादि दर्शान्तमष्टम्यादि सद्यो स्मिन्वेति। एतेषु
पक्षेष्वसक्तस्य कस्मिन्दिने वा महालयश्राद्धं कुर्यात्॥ अत एव नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे।
जवे श्राद्धं न नः कुर्यात् कस्मिन्नपि वासरे। तस्य संवत्सरं यावत् सम्युमवि नो ध्रुवमिति। अस्मिन्पक्षे वर्ज्यं ज्योत्याह गार्ग्य जैमनी

७१

दापौत्तागेवदिनेत्रयोदश्यां द्विजन्मसु। एष्वश्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति। नंदाः प्रतिपत्स्यष्ठेकादश्यः। त्रिजन्मानि
आश्रेषदशमे कोनविंशपत्तिस्थानाः॥ सप्तजन्मनो॥ तानो जोमोत्रयोदश्यां नंदाकृगुमघासुच। पिंडदानं मृदा स्नानं न कुर्यो तिलतर्प
णं॥ वृद्धगार्ग्यः॥ प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा। जत्तु श्राद्धं न कुर्वीत सपुत्रो विनश्यति॥ प्रजापत्यं तो हिणी॥ पौष्णं रेव
ती॥ पित्र्यर्क्षं मघा॥ प्रतिपदादितिथिषु प्रतिदिनं श्राद्धकरणे॥ पूर्वोक्तं नंदादयो न वर्ज्याः इत्याह॥ कार्ष्णाजिनिः॥ नक्षत्रस्यापि
नेपक्षे श्राद्धं कार्यं दिने दिने। नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति। जत्तु प्रतिपत्प्रभृति तिथ्येकां वर्ज्यित्वा चतुर्दशीमिति
जानत्व त्यजनापनपन्नतिथिषु चतुर्दश्यां श्राद्धानहतान्निषिद्धानंतदपनपन्नान्नविष्यं जं महालये प्रतिपदादिपक्ष व्याप्ति
कपक्षविषयं च उदाहृत कार्ष्णाजिनिवचनविरोधात्॥ अस्मिन्नपनपक्षे जालन्नातीतस्यां श्राद्धकरणे॥ महत्पुलमित्युक्तं॥
मत्स्यपुराणे॥ ॥नरत्ती पितृपक्षे तु महतीपति कीर्तिता। तस्यां श्राद्धं कृतं येन सगयाश्राद्धकृद्भवेत्॥ अश्राद्धकरणे॥ महत्
पुलमित्युक्तं॥ ॥ब्रह्माण्डपुराणे॥ आश्वयुज्यां च मे पक्षे गजाम घाष्टमी स्मृतः। त्रयोदशी गजच्छाया यागया तु त्यपेत्तुपेन्नक
पुराणे॥ सन्न्यासिनो प्याहिका दिपुत्रः कुर्याच्चधार्तितिथि॥ महालये तु जध्रीद्धं द्वादश्यां पार्थि॥ वियाने नकत्नेदौ॥ तथा च वायु
समवश्यं कलेवौ॥ तथा च विष्णुधर्मोत्तरे॥ साद्धकालममावास्या नित्यं पार्थिवसत्तम। पौषमासीतथा माघी सावर्णी च
न्यपोत्तम। प्रौष्ठपद्यामतीतो नंतथा कृष्णत्रयोदशी॥ एतानि साद्धकालानि नित्यान्याह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो
नरकं प्रतिपद्यते॥ अस्य च श्राद्धस्य प्राशस्त्यमाह॥ मनुः॥ जत्किंचिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीं तु। तदप्यनजनमेव स्या

ने०

178

श्रौ०॥ २८

वर्षासु च मघासु च। विष्णुः। अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः। प्रावृट्काले ऽसिते पक्षे त्रयोदश्यां समाहितः। मा
त्कटेन यः श्राद्धं पायसेन समाचरेत्। कार्त्तिकं सकलं वापि प्राक्छाये कुंजरस्य वेति। यमः। गाथास्तु पितृभिर्गीताः कीर्त्तयन्ति पुरा
विदः। अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीं पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु चेति। शंखः। पिता पितामहस्तथैव
प्रपितामहः। जातं पुत्रं प्रशंसन्ति पिप्पलं शकुना इव। मधुमांसेन पयसा पायसेन वा। एष दास्यति नः श्राद्धं वर्षासु च म
घासु च। अत्र त्रयोदशी यदास्वयणात्। त्रयोदशी योगाभावेपि मघासाद्धं कर्त्तव्यं। तथा च वायुपुराणे॥ मघासु कुर्वन् श्राद्धानि
सर्वान्कामानवाप्नुयात्। प्रत्यक्षमर्चितास्तेन तत्त्ववेति पितरः सदा। माघाश्राद्धं च यः कुर्यात्तस्य पुण्यफलं शृणु। पितास्तस्य
तुष्यन्ति सन्ततिस्थान्नपालवेत्। एतेनैव तु योगेन वर्षपानमुपानहौ। यो ददाति मघाश्राद्धे भोजनेन विशेषतः। त्रयोदशी सम
न्वासप्तकल्पान्ति पितरो नोऽपयेति। यत्तु [illegible]॥ मघासु कुर्वतः श्राद्धं ज्येष्ठः पुत्रो विनश्यति। संक्रान्त्युपवासं च चंद्रसूर्यग्रह
तिथेति वचनं। तत्पिण्डकः श्राद्धविषयं। अत एव तद्विष्णुपुराणे॥ संक्रान्त्यामुपवासेन पारणेन च नान्नतामघासौ पिण्ड
दत्तेन ज्येष्ठः पुत्रो विनश्यति। तस्य ज्येष्ठपुत्रवता पिण्डकं मघाश्राद्धं कर्त्तव्यमिति। याज्ञवल्क्यः। यद्ददाति गजाश्वस्वस
र्वमानन्त्यमश्नुते। तथा। वर्षासु त्रयोदश्यां मघासु च विशेषतः। प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं। प्राप्य श्राद्धं प्रक
र्त्तव्यं मधुना पायसेन चेति॥ ॥[illegible]॥ ॥यो वासौ वद्धिपेद्धे हे त्रत्यहं स्वात्म विक्रयान्। श्राद्धं तेनापि कर्त्तव्यं तैसैर्द्रव्यै
सुसंचितैः। त्रयोदश्यां विशेषेण वर्षासु च मघासु च। नास्मात्परतरः कालः श्राद्धेष्वन्यत्र विद्यते। यद्द्वसाक्षात्पितरो ग्रह्णन्त्य
मृतमन्नाद्यमिति। पुत्र वद्धह स्थेवन सपीसाद्धं न कर्त्तव्यमित्युक्तं याति दृहस्पतिना। कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नराः॥

२८

पैतृकं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितं ॥ ॥वामनपुराणे॥ ॥त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान्गृही। तेष्वपतेत्सोपवासाश्चैके
क्षिद्रूपजनक्षजे ॥नागरखंडे॥ जो वा प्रतिनतो मुक्तिपितृस्तिः सहचात्मनः। अ संतानस्य वपत्तस्य श्राद्धं प्रोक्तात्रयोदशी। संतानयुक्तोजः
कुर्यात्तस्य वंशात्रयोदशी न वेन्नातत्रैव अपच प्रवर्त्तितजः श्राद्धं त्रयोदश्यां कनिष्पति कन्यासंस्थे सहस्रांसौ तस्य श्राद्धं शसंज्ञजः। इति शापेन
देवानां निषेधे जन्महानिथिः। ततः प्रवर्त्तिनेतस्यां क्रियते श्राद्धमुत्तमं। जः प्रमादेन कुर्वीत तस्य स्पार्द्धं श्रसंज्ञजः। एतत्त्रयोदशीश्राद्ध
वंशोच्छेदस्य कारणं। एतत्पूर्वोक्तं त्रयोदशीश्राद्धं माहात्म्यावि ष्यजकृ हितुक देवताराग पत्रूपी। रवौ श्राद्धं निषेधे सत्यपि पुत्रवत्कृ हस्थ
निति कर्तव्यतान हितं पितृदेशेन त्राप्ताणा सीतपो॥ मवश्यं कर्तव्यं। तथा चोक्तं॥ पूर्वोदाहृतवचनानंतरं नागरखंडे रवौ अतः
श्राद्धं विना दर्शेन तद्दिने मघ्यपापसं। खड्गमांसं कालशाकं मासं व श्रीनस संच तस्य नावपिदा नयं जीनोदनमनुत्तमं। तस्मिन्क
हनि विप्रेत्यः पितृणां तु ष्टजेन पेति। अतः पूर्वोक्ता श्राद्धसंज्ञजन्नूपाद्धोष्पात्र। एतत्त्राप्ता। तोजन पितृवर्गमत्रे द्दिशेन न
कर्तव्यो। किंतु मातामहवर्गोद्दिशेनापि अत एवा कार्ष्णाजिनिः। श्राद्धं नैकस्य वर्गस्य त्रयोदश्यामुपक्रमेत्। अतत्प्राप्तत्रजेस्य
स्युः प्रजा हिंसीतिनेगजामिति॥ मत्स्यपुराणेपि। नैद्धे त्रयोदशीश्राद्धं पुत्रवान्पुत्रसुतायुष्ये। एकस्यैव न कुर्यात्सपार्श्वे। तु समा
तनेन। जः पुत्रवान्सुतायुष्ये त्रयोदशीश्राद्धं नैकस्य एकस्यै पितृवर्गस्य न तु कुर्यात्॥ किंतु पार्वणे। पर्वणोपमावास्यायां क्रियमाणी
न च श्राद्धं तत्तुल्यं पण्डे पत्नी श्राद्धं तादितन्यर्थः। अपन पन्न चतुर्दश्यां शास्त्रहतादीनामेव श्राद्धं कर्तव्यं नान्येषां। अत एव नाग
रखंडे। प्रतिपत्प्रभृति ह्येके वर्जयित्वा चतुर्दशीम्। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते॥ ब्रह्मपुराणे॥ प्राजेनाशकश
स्त्राग्निविषाद्यैर्घनिनीतया। चतुर्दश्यां तु कर्तव्यं तत्तृप्त्यर्थमितिनिश्चयः॥ ॥नागरखंडे॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्यु

ने०

179

श्रीः॥

७८

७८

यथा पिता ॥ उपसर्गो विद्युतानां च विषमृत्युमुपेयुषां ॥ वह्निना च प्रदग्धानां जलमृत्युमुपेयुषां ॥ सर्पव्याघ्र एतानां च मृतस्य
बंधनेन च ॥ साद्धं तेषां प्रकर्तव्यं चतुर्दश्यां न चाधिपेति ॥ अपमृत्युनकालमृत्युः ॥ आत्मत्याजनसामेवमृत्युनित्यर्थः ॥ उपसर्गो
भूतमहामारिकृता पीडा ॥ [illegible] ॥ युवानः स्युः हे यस्मृतास्तेषां अदपपेत्र ॥ शस्त्रेण तु हता ये वै तेषां दद्याच्चतुर्दशीं ॥ मनीषिः
विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनां ॥ चतुर्दश्यां क्रिया कार्या येषां मृत्युर्विगर्हितः ॥ विषादिकृताघातो येषां सत्रिनेतथा
क्रमप्रवेताः ॥ ब्राह्मणो हा ॥ लोहाघेर्घियुद्ध ॥ ला विषादिभिः नपि दंष्ट्रिविपन्ना ये तेषां शस्त्रा ॥ चतुर्दशीति ॥ आदिशब्देन तद्भृगु
पतनादयो गृह्यन्ते ॥ ये तु शास्त्रस्यनुज्ञया जलाग्निप्रवेशादिना मृताः ॥ तेषां चतुर्दश्यां साद्धं न कर्तव्यं ॥ अत एव [illegible] ॥
जलाग्निस्यां विपन्नानां सन्न्यासे वा गृहे पथिः ॥ साद्धं कुर्वीत तेषां वै वर्ज्यो जित्वा चतुर्दशीं ॥ मिति जलाग्निमृहा ॥ विद्विपनिग् ॥ शी
तद्भृगुपतनादिमनः ॥ हेतूपलक्ष ॥ अर्थं यानि तु पूर्वोदाहृतवचनानि तान्यवैयमना ॥ विषजानि ॥ एवं च पतिमनः ॥ नन्दनेश
स्त्रविहिताग्निप्रवेशेन मृतामीश्री ॥ मपि चतुर्दश्यां श्राद्धं न कर्तव्यं ॥ आहवेषु विपन्नानां जलाग्निर्भृगुपतिनां चतु
र्दश्यां न वेत्यूजा अमावास्यां कामिकी तिदेवीपुना ॥ वचनात् ॥ द्वंद्वसाद्धं पितुन्न पैकोदिष्टविधिनैव कर्तव्यं ॥ तदाह [illegible]
चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणा ॥ त्परं ॥ एकोद्दिष्टविधानेन कार्यं तच्छस्त्रघातिन इति ॥ [illegible] ॥ समत्वमागतस्यापि
पितुः शस्त्रहतस्य तु ॥ एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये ॥ समत्वमागतस्य कृतसपिंडीकरणस्य ॥ अत्र शस्त्रहतग्रहणं
विषयपूर्निगृहीतपूर्वोक्तजलाग्न्यादिमरणा ॥ हेतूपलक्षणार्थं ॥ मनुः ॥ एकपिंडीकृतानां तु पृथक्त्वं नोपपद्यते ॥ सपिंडीक
रणाद् ऊर्ध्वमृते कृष्णचतुर्दशीमिति ॥ अत्र केचिदेवमाहुः ॥ यथा वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यत्र वसन्तकाले ब्राह्मण ॥ स्यैवा
ग्न्याधानं ब्राह्मणस्य वसंतकाल एवाग्न्याधानमित्युक्तनियम ॥ अत्रापि शस्त्रहतानां ॥ जत्रियादीनां च वसन्ते आधा

नेविधानाद्वचतुन्नयत उत्तंच निगमः॥ अत्र तु प्रतिपत्प्रभृतिष्वेकैव वर्ज्या पिला चतुर्दशी॥ शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदी-
यत इति याज्ञवल्क्यः॥ वचनं तु यदस्तु शस्त्रहतानामेव चतुर्दश्यामिति निगमः॥ शस्त्रहतानां चतुर्दश्यामेवेतु न निगमदिना
न्नने ण्वपि सामान्यवचनग्राह्यस्थापनपन्नश्राद्धं स्वबाधकत्वात्तेन निवर्त्यं पित्वा तु मशक्यत्वात्॥ आह वेसुविपन्नानीजल
ग्निस्त्रंगु पातिनां॥ चतुर्दश्यांपील वेत्पूजा ह्यमावास्यांतु काम्यिकीति॥ देवीपुराणावचनेन शस्त्रहतानां दिनीतनेपि प्येकमेव श्राद्धं विघ्न
नाव्र पूजाश्राद्धं अमावास्यागनहा॥ तिथ्यन्तनो पलन्त्या॥ जो यजक्रियि श्राद्धफलकामः॥ सतस्यातिथौ शस्त्रहतामुद्देशेन श्राद्धं
कुपोदित्यर्थः॥ यदि पित्रादिषु त्रिष्वेकशस्त्रहतस्तदेकमेकोद्दिष्टं कार्यं॥ यदि द्वौ शस्त्रहतौ तदेकोद्दिष्टद्वयं कार्यं॥ तथावस्मृत
यदि पित्रादयस्त्रयोपि शस्त्रहतास्तदात्रयाणां च पार्वणं श्राद्धं कर्तव्यो॥ त
न्त्रेण॥ एकस्मिन्नह्नि चेद्बहूनामेकोद्दिष्टविधिरिति॥ यदि पित्रादयस्त्रयोपि शस्त्राद्धतास्तदात्रयाणां एकोद्दिष्टविधानेन तत्कुर्यात् शस्त्रघातिनां॥ पित्रादयः शस्त्रजाजस्य
दाह प्रचेताः॥ चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणेऽकृते॥ एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रघातिनां॥ पित्रादयः शस्त्रजाजस्य... आस्मिन्नन्नादपदापन पञ्चत्वेन विलम्ब तिवचेनमह
शस्त्रघातस्य त्वनुक्रमात्॥ सत्यं तेपार्वणं॥ कुर्यादादिकानि पृथक् पृथगिति॥ अस्मिन्नेव तिथौ तत् श्राद्धं कर्तव्यं॥ तदाह यमः॥ हंसे वर्षासु कन्यास्थे शा-
कश्राद्धं करणीयं॥ आश्विने तु शुक्ले पञ्चम्यन्ताषुतिथिषु कस्यांचित्तिथौ तत्श्राद्धं कर्तव्यं॥ तदाह यमः॥ हंसे सूर्ये॥ एतस्मिन्नपि काले कर्तुं विघ्नाद्यावद्यनाद्धश्विके सैप्रे
केनापि महेवस्ततः पञ्चम्यां नान्तनेदशमावुदयनापिपञ्चपां॥ हंसे सूर्ये॥ एतस्मिन्नपि... आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा॥ तावच्छ्राद्धस्य का-
तिपर्वतेष्वपि दिनेषु कस्मिंश्चिद्दिने कर्तव्यं तथा च ब्रह्मपुराणे॥ यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः॥ तावच्छ्राद्धस्य
लस्याध्रूर्न्यं प्रेतपुरं न तदा॥ तथा॥ कन्यागते सवितरि पितरो यान्ति वै सुतान्॥ शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनं॥ तत्र वृश्चिके त्रा
निनाराः पितरो गताः॥ पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणं॥ नागरखण्डे॥ मासद्वयं प्रतीक्षन्ते गृहद्वारं समाश्रिताः॥

वाऽनुभूताः पिपासार्त्तोऽन्नुक्षामपि तनोऽनूणाः ॥ यावत्कन्यागतः सूर्यस्तुलास्थश्च महीपते । अत्रापि यावति काले कन्यास्थः
सूर्यस्तावत्कालः प्रशस्तः ॥ तदुक्तं नागरखंडे ॥ प्रेतपक्षे व्यतिक्रांते यावत्कन्यागतो रविः । तावच्छ्राद्धं प्रवांछंति दत्तं चैव पितरः
सुतैः ॥ तुलास्थेऽपि सूर्ये कालान्तरमापेक्ष्य दीपावलीसंज्ञकामिन्दुनामावास्यां प्रशस्ताः ॥ तथा च सुमन्तुः ॥ कन्यानामसौम हानां ज
यावृश्चिकं वितावसुः । तस्मिन्काले तु वृद्धैव वृश्चिकं यावदागतं । दीपान्विता नाम जनैः ख्याता पंचदशी तु वै । तस्यां दद्यान्न चेद्
त्तो पितृणां वै महालयः ॥ ॥ इति श्रीजिनप्रकाशे समयनिर्णये पोषाधौतेष्टि द्विसाद्धं महालयापनयनं स्नानकालनिर्णयः
॥ ॥ अथ स्नानकालः ॥ ॥ तत्र स्कन्दपुराणे ॥ पूर्णिमा प्रतिपत्तौ योनाहुः सं पूर्णिमे ऽलीगन सतेचं क्रमधर्मं स्वदर्शं प्रतिपद
तने ॥ ब्रह्मसिद्धान्ते ॥ यावान्कालः पर्वणो गतस्तावान्प्रतिपदादिनः नवीदुग्न हाणाने हासपुण्यो मिश्रवान्तवेत् ॥ पद्योन्नजकाल
मासकालः प्रतिपदादिकालो मोक्षकालः ॥ व्यासः ॥ त्रिदशास्पर्शसमये तु पश्चिपिन न लघ्या मनुष्यामध्यकालेतु मोक्षकाले
तु नाज्ञसंऽयत्नमममध्यमक निष्ठ कालाइत्यर्थः ॥ विष्णुः ॥ संध्यानात्रो न कर्तव्यं साद्रे स्वलु विचक्ष ॥ ग्रहणेन पि चकुले योजदि
स्याद्गहुदर्शने ॥ ॥ मत्स्यपुराणे ॥ वैद्यभूर्जग्रहे चैव मनोः पुत्रजन्मनि ॥ मलमासे पिदेज स्यादत्ममज्जपकानके ॥ लिंगपुरा
णे ॥ वैद्यसूर्जग्रहे स्नाजाज्जस्तमग्रे सूतके पि वा ॥ अस्नापीमृत्युमाप्नोति स्नापी मृत्युं न विंदति । सूतके मृतके चैवन दोषा
हुदर्शने । तावदेव स्तत्वे पुष्ट्रि जीवन्मुक्तिन्नेक्षपते । एकग्रंथस्य वचनद्वयमध्ये पूर्ववचने स्नानपत्नी उत्तरे श्राद्धदानादिपु
ग्रन्न्यथापोननुक्ष्याप्तलेः ॥ अगिनाः सर्ववर्णानां सूतके पि न स्नाजाच्चदि मानवः । सप्तजन्मनि कुष्ठी स्याद्दुःखनागी च जायते ॥
मार्कण्डेयः ॥ ॥ वैद्यवापदि वासूर्यदृष्टे नाहो महानहो । अन्नजपे कपि तेपुण्यं तत्राघूर्तु विशेषतः ॥ नृशस्वत्रुर्व्यापनत्वा
त् मिघाघश्च न्ने स्नानाघघिकानोक्ति । यदिपन विशेष्यपनिकल्प्यत तत्र्यैव मेघादि घन्नेपि कल्पनीजी चनुगेचिन लेत्व

श्रीः ॥
१८०
१८०
१८०

घिकं फलं तद्दत्वा वेततोन्यूनमिति। येतुव्यद्विशन्मतेपि विविक्तित्वं तेषामपनाके विज्ञानेश्वरवं द्विकाकान हेमाद्रिग्रन्थतजः प्रतिमद्दीक
र्त्तव्यः। एवं च गमृत्वास्तसमर्जेष्वितीय दिनिमेघादितिपुक्तसदर्शने पिशाश्वदर्शनसंभवात्स्नात्वात्तोजनाधिकारोस्ति॥ तिन्जानतः॥ प्राप्नाव
पयादमनुः॥ चंद्रसूर्यग्रहेनास्याद्घात्स्नात्वा विमुक्तयोः अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वापरेहनीति॥ महाकालनते॥ अथेग्रासमत्रयादिद्ग्रहग
णात्तु जिमावनेरं चतुर्मर्यादद्यस्त्वेवनाहुनस्तेदिरक्तुने। एतच्च कालादिव्यतिरिक्तविषयं तथा च वृद्धवसिष्ठः॥ सूर्यग्रहेतु नाश्नीया
त्पूर्वं यामचतुष्टयं। इंदुग्रहेतु यामांस्त्रीन्बालवृद्धातुरैर्विना॥ बालादिविषयेतु मनुः॥ अपराह्णेनमध्याह्ने मध्याह्नेनतुसंगवे॥ भुंजीतसं
गवेचेत्स्यान्नपूर्वं भोजनक्रियाः समर्थविषयनिषिद्धकालेतुक्तं तत्र कात्यायनः॥ चंद्रसूर्यग्रहेनाद्यात्प्राजापत्येनशुद्ध्यति। तस्मि
न्नेवदिनेभुक्त्वा त्रिरात्रेणोपशुध्यति॥ महाकालेतुक्तोप्राजापत्यं ततः पूर्वं निषिद्धकालेतुत्रिरात्रमितिविवेकः॥ जदाचंद्रग्रहणा
गस्तोदयस्तदातस्मिन्नहनिनाद्यात्। तथा च मार्कण्डेयः॥ चंद्रस्य जदिवा ता नोर्ध्वस्मिन्नहनि त्वागवेः॥ महार्णां तु नवेत्तत्र न पूर्वं भोजना
क्तं। नचनेत्संगमहेवेवतथेवास्तमुपागते॥ यावत्स्यान्नोदयस्तस्य नाश्नीयात्तावदेव तु॥ मुक्तिं दृष्ट्वा तु भुंजीत स्नानं कृत्वा ततः परं॥ दृष्टि
ज्ञानोपलब्ध्यात्॥ तथा च वृद्धगौतमः॥ चंद्रसूर्यग्रहे नाद्यादस्मिन्नहनि पूर्वतः॥ नाहोर्द्धिमुक्तौ विज्ञाय स्नात्वा कुर्वीत भोजनं॥ जलु विष्णु
धर्मे॥ अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति॥ एतदपि ग्रहास्तसमयविषयं॥ सू
र्यग्रहे त्वस्तंगते महाकालपूर्वासह त्यागः। महाकालस्तु नाद्विनीरात्रिश्चेत्यहोरात्रे भोजननिषेधः॥ चंद्रे ग्रस्तास्तंगते महाकालनात्रिनन्दि
माहस्वेत्यहोरात्रं॥ ॥ इति श्रीनंदपंडितप्रकाशे महाकालः समाप्तः॥ ॥ अथाधिमासे विहितानि निषिद्धानि च॥ तत्र
तातपः॥ एकसंज्ञोपदामासौ स्यातां संवत्सरे यदि॥ तत्राद्ये पितृकार्याणि देवकार्याणि चोत्तरे॥ व्यासः॥ षष्टिरिर्द्विवसे मासे कथि
तोवादनायणैः। देवकार्याणि वचनद्वयबलादावश्यकानि देवपितृकार्याणि पुनर्जत्रकर्तव्यता प्रतीयते एवमादीन्यन्यान्यपि वच

नान्यावश्यकं देवकार्यं पित्र्यं विप्रजानि॥ ॥तथा च बृहस्पतिः॥ ॥नित्यनैमित्तिके कुर्यात् प्रयतः सन् मलिम्लुचे। तीर्थस्नानं गजच्छायां प्रेतश्राद्धं तथैव च। नित्यं जन्दहं कर्म कालातिक्रमनिमित्तं प्रायश्चित्तं सूजने तथा। अग्न्याधेये पथिकृते पुनोऽशमष्ट कालं निषेधो दर्शपौर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं चातिपातयेदिति। नैमित्तिकं यस्याग्निर्गृहान्निर्दहेत् कातत्र प्रायश्चित्तिनि पक्रम्य पुनराधाय हृदाघोष्टिर्विहितान् नैमित्तिके॥ अथ मलिम्लुचे त्याज्याः॥ यस्यातिक्रमे प्रायश्चित्तप्राप्तिः यस्य गृहदाहे ज्यादर्शमासान्तेन विहितकालासंभवेन मलमास एवास्य कर्मानुष्ठानं तत्सर्वमधिमासेपि कर्त्तव्यमिति॥ गृह्यपरिशिष्टे॥ अवर्ष्ये न होमाश्च पर्व्वणि गनाय॥ तथा। मलमासेपि कर्त्तव्यं काम्या इष्टिर्विवर्जयेत्॥ अवर्ष्ये न होमाः अग्निहोत्रोपासनवैश्वदेवाद्याः दर्शपूर्णमासोपपर्वपार्व्वणश्राद्धं॥ स्थालीपाकस्य। आग्रयणं आग्रयणेष्टिः आपदि पुनराधानं पानावेपि कर्त्तव्यं आग्रयणेष्टिश्चनापदि। स्मृत्यन्तरे आग्रयणं निषेधान्॥ यमः॥ गर्भे वार्द्धुष्यके नित्ये श्राद्धकर्म्मणि मासिके। सपिण्डीकरणे नित्ये नाधिमासं विवर्जयेत्। तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः। जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च। मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश। चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं। काम्याणि मलमासेपि नित्यं नैमित्तिकं तथा। गर्भे गर्भनिमित्ते पुंसवनादि कर्मसु। वार्द्धुष्यके अशीतिकागो वृद्धिः स्यादित्यादिति। शुक्रवृद्धिमहालये नित्ये नृत्यस्यवेतनदाने। श्राद्धकर्म्मणि मासिके अमावास्याश्राद्धे केचनत्रन्थ्यपर्शं गवत्तनमन्यथापवित्वामासास्यापश्राद्धनिषेधमपि कुर्वन्ति। वचनं तु। संवत्सरादिने कोस्वेमासोजस्यात्रयोदशः। तस्मात्रयोदशीश्राद्धं न कुर्यादिदुसं जपइति। अपरे च पाठेन न कुर्यात्ताकुस्मतिविनोपायादनेकानिर्वंधकानेननाहत त्वाञ्च। अपरे तु तस्मात्रयोदशीश्राद्धं न कुर्यान्नोपपतिष्ठते॥ इति पठन्ति। अयमेव पाठोऽयुक्तः॥ अयं च निषेधो दर्शश्राद्धाद्विपतिनिक्रविष्यपः। तीर्थस्नानं पूर्वापक्रान्तौ तथा जपस्वाध्यायादिनित्यहोमो नित्यहोमः॥ पाकयज्ञपरिशिष्टे। मलेनानन्यगतिर्नित्यं कुर्यान्नैमित्तिकीं क्रियां। सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे तथैवाग्न

प्राणाधानचातुर्म्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्म्माद्यपि कर्म्म यत् । स्पष्टमासविशेषाख्याविहितं वर्ज्जयेन्मले ॥
म- तज्योत्स्नामपराधपतापज्ञः ॥ स्पष्टमासविशेषेति ॥ मासविशेषनाम्ना ग्रहणेन जद्विहितं वैशाख्ये कर्त्तव्यमित्येवं तदपि तथा । प्रेत
मासाद्यादिमासिकानन्त्यश्राद्ध पिंडोदकक्रिया । सपिंडीकरणं तस्य यथाकालमुपस्थिताः ॥ अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे ॥ अ
गस्त्यः ॥ न कुर्यान्मलमासे तु कर्म्म कर्म्म कथंचन । मुक्त्वा नैमित्तिकं श्राद्धं तत्तु तत्रैव कीर्त्तितम् ॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमु
च्यते । तत्कार्यं पूर्वमासेपि कालाधिक्येपि धर्म्मतः । एकोद्दिष्टस्य षोऽश श्राद्धादि पूर्वमासेप्यपिशब्द एवकारार्थः । पूर्वमास एव कर्त्त
व्यमित्यर्थः ॥ कौथुमिः ॥ अब्दमेकं ग्रहं दद्यादद्यात् वा पितुः संचितं । संवत्सरे विवृद्धेपि प्रतिमासं च मासिकं । मलमासमृतानां तु संव
वत्सरिकं पुनर्मलमासपाने मलमास एव कर्त्तव्यं ॥ नष्टस्तु द्वे तथा च वृद्धगुः ॥ मलमासमृतानां तु संवत्सरिकं पुनर्मलमासपाने मलमास
एव कर्त्तव्यं ॥ नष्टस्तु द्वे तथा च वृद्धगुः ॥ मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरं । मलमासे तु तत्कार्यं नान्येषां तु कथंचन । तु शब्द एवकार
र्थे । व्यासः ॥ अधिमासे विपन्नानां क्षीनमानं समासयेत् । स एव तस्य मासोपि श्राद्धपिंडक्रियादिषु । यद्यन्यस्मिन् वत्सरे दैवादधिमास
स्य पोद्भवः ॥ तथाप्यथमाब्दिकमधिमास एव द्वे पति पूर्णे सपिंडीकरणं । पञ्जासपाणेपि तथैव सपिंडीकरणं । तदाह वशिष्ठः ॥ असंपूर्णे
ते पि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः । तथैव मासिकं श्राद्धं सपिंडीकरणं तथा । यत्तु सत्यव्रतेनोक्तं ॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृ
ताहनि । मलमासे न कर्त्तव्यं व्याघ्रस्य वचनं यथा इति । एतदधिमासादन्यत्र मृतस्य सांवत्सरिकस्य विषयं । प्रथमाब्दिकव्यतिरि
क्तविषयं च । अत्र मलमासो नाम अधिकमास एव न तु क्षयमासः । क्षयमासे तेनैव श्राद्धविधानात् ॥ एक एव यदा मासः संक्रांति
द्वयसंयुतः । मासद्वयगतं श्राद्धं मलमासेपि शस्यते । इति गालवोपि ॥ वर्षे वर्षेपि यच्छ्राद्धं मातापित्रोर्मृते हनि । मासद्वयेपि
तत्कुर्याद्व्याघ्रस्य वचनं यथा । मासद्वयेपि ॥ संक्रान्तिद्वयसंयुक्तत्वात् क्षयमास एव मासद्वयात्मकः । अपिशब्द एवकारार्थः । क्षय

नि०

182

मास एव श्राद्धं कुर्यादिति ॥ एवं विधान्यन्यान्यपि वचनान्यपि नैव विष्णमेजोज्यानि ॥ द्वितीयाब्दिकं शुद्ध एव कार्यं तासीनु श्राद्धकृते
मासिकं कुर्यात् श्राद्धं यथाविधि । तथैवास्य दद्यात् सर्वं नित्यमेकं हि सर्वदेति । सत्यव्रतस्मरणात् ॥ श्राद्धकृते शुद्धे । नित्यं नियमेन एकमेव शु
द्धेनुर्यन्निमज्जमासस्तत्पर्थे प्रथमाब्दिकं मलिम्लुचे वक्कुर्वीत पुनर्नाब्दिकं द्वितीयाब्दिकं त्रयोदशमासि पतितृणां चतुर्दशमासप्र
थमदिने कुर्यादिति । अधिमासे काम्यव्रतादीनामारंभः प निसमाप्तिस्वेति द्वयमपि निष्पिद्धं जन्मासेतु प्रथमोत्तिर एव निषिद्धः ।
इति संक्षेपेन मलमासे विधिनिषेधोकमौ ॥ दर्शितो । विशेषस्तु मलमासनिर्णय द्रष्टव्यः उक्ता स्वाद्योपयुक्त कालाः ॥ ॥
इति श्रीजैमप्रकाशे मलमासे निर्णयविधिः समाप्तः ॥ ॥ अथ संतानसप्तमीव्रतं ॥ ॥ माघे मासि शुक्लसप्तमीमाधाने तु सा प्रके
नीशु विगोमयं तुम निर्वंतोऽर्ण फलं शाश्वतं कं दमूलमुपोष्य जेन विधिवत् कृत्वे कलशं पुनः पुनः नीवं वाह्नसनं घृतासनं विधेयो प्रा हुमेगा
धेनुघा कृत्वा वत्सनसप्तमीनविदिने प्राप्नोत्यचीर्णफलं ॥ ॥ इति सप्तमीव्रतं ॥ ॥ अथ आदित्यव्रतविधिवत् ॥ ॥ तुलसीपत्रत्र

१८२

यं मार्गे पौषे घृतपलत्रयं । तिलमुष्टित्रयं माघे तु पलं फाल्गुणे दधि चैत्रे दुग्धपलत्री ॥ वैशाखे गोमयं तथा । जलांजलित्रयं ज्येष्ठे
आषाढे मनि चत्रयं । श्रावणे सक्तुमष्टी ॥ त्वाद्रे गोमूत्रमेव वा आश्वयुपलत्रयं वाश्वे कार्तिके तंदुलान्यजः संवत्सरव्रतं पूर्णमत्तीष्टफ
लमाप्नुयात् ॥ ॥ इति आदित्यव्रतविधिः ॥ ॥ तत्र प्रथमं दानप्रशंसा ॥ ॥ नन्दिपुराणे ॥ दानं पनं प्रशंसंति दानमेव प
राजा ॥ दानं वंधुर्मनुष्याणां ॥ दानं कोशो धनुत्तमः दानं कामफलो वृक्षो दानं चिन्तामणि ॥ ॥ दानं पुत्रः परं दृष्टं दानं माता पि
ता तथा । न दानेन विना किंचिद् दृश्यते भुवनत्रये । दानेन प्राप्यते स्वर्गः श्रीर्दानेनैव लभ्यते ॥ दानेन लभ्यते विद्या दानेन युवती जनः ।
धर्मार्थकाममोक्षाणां साधनं परमं स्मृतमिति । नृयामहानानतोपि ॥ ॥ जानीमात्युत्तमानीह वेदोक्तानि त्रसंसजः तेष्वपि से
ष्टतमं दानमिति मे नास्ति संशयः ॥ ॥ विष्णुधर्मोत्तरे ॥ ॥ दानं देवाः प्रशंसंति मनुष्यास्तथा द्विजाः दानेन कामनाप्नोति

पान्कांक्षिमनसेच्छति ॥ व्यासः ॥ नासादृद्धेम पिनासमर्थितस्तः किं न दीयते । इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ पुनर्व्यासः ॥ अहन्य ह
निजार्वं तमहं मथा । दानेन तपसा चैव सर्वपापमपोह्यते । कुतेन शाम्यते पापं स्वाध्यायेन शान्तिमुत्तमां । दानेन तोगाइत्जाकुलं तपसा सर्वमाप्नुते ।
मनुः ॥ कृते तपः प्रशंसंति त्रेतायां ज्ञानमुत्तमं । द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे । यमः ॥ पतीनां पतमो धर्मो स्वानाहानो वनो कसी । दानमेव गु
रूपाणी शुसूणां अलवानि ॥ मृ ॥ ॥ विष्णुधर्मोत्तरे ॥ ॥ अदत्तदानान्नृपा नृहद्धे हपनतर्जकान् । पानत्रिकं विधिकं कुर्वाणो दानं विप्रेभुम
नवः ॥ नृप ॥ नृ विकलानूपनतर्जकान् अर्थिनूशीलान् ॥ व्यासः ॥ जीवितं यस्य जीवन्ति विप्रा मित्राणि बांधवाः । सफलं जीवितं तस्य आत्मार्थे
को न जीवति ॥ ॥ मत्स्यपुराणे ॥ ॥ न्यायेनार्जनमर्थस्य वर्द्धनं चाभिरक्षणं । सत्पात्रप्रतिपत्तिश्च सर्वशास्त्रेषु गीयते ॥ ॥ अथ दानस्वरूपं
तत्र देवलः ॥ अथातो दानविधिं व्याख्यास्यामः ॥ ॥ अर्थानामुदिते पात्रे सद्धया प्रतिपादनं । दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते ।
अर्थाजीन्याजार्जिता नामि तिशेषः उदिते शास्त्रकथिते सद्धाशब्देन तक्ति न प्पुपलक्ष्यते ॥ तदुक्तं हेमाद्रौ ॥ नाल्पत्वं वा बहुत्वं वा दानस्या
दयावहा सद्धात्तक्ति स्वदानानां वृद्धिक्षयकरे स्मृते । प्रतिपादनं समर्पणं पात्रस्य स्वत्वापादकस्त्याग इति यावत् ॥ ततश्चान्यायागतार्थस्य सद्धादि
नापात्रस्वत्वापादकत्यागो दानमित्यर्थः । इदं च दानस्वरूपानि धानं शास्त्रसंपूर्णफलजनकदानविषयं अन्ये प्याम पिकामदानानीत्र
दिप्रसंगेन अपात्रे प्यपि नागे गाशास्त्रेषु उक्तत्वात् ॥ तस्येति उक्तलक्षणस्य दानविशेषस्य व्याख्यानं विविध्यकाम दानादि सूपः पृथक्त्व
निरूपणं वक्ष्यते कनिष्यते । धात्वर्थे अविवक्षित्वा पाकः पच्यते इति ॥ वत्सयोगः ॥ उक्तदानस्वरूपं गम्याह स एव दाता प्रतिगृहीता च श्रद्धा
देयं च धर्मयुक् । देशकालौ च दानानामंगान्येतानि षड् विदुः ॥ धर्मयुग्देयं न्यायार्जितं द्रव्यं तिष्णो स्वरूपमाह स एव । अपापरोगी धर्मा
त्मा दित्सुरव्यसनः शुचिः । अनिंद्याजीवकर्मा च षड्भिर्दाता प्रशस्यते । अपापरोगी पापरोगरहितः ॥ पापरोगाश्च तेनैवोक्ताः ॥ उन्माद

जे०

स्त्वग्दोषो नाऽजजन्मा स्वासो मधुमेहो लगन्दनामहोदनो ऽस्मीत्यष्टौ पापरोगाः॥ अव्यसनो द्यूतादिव्यसनरहितः॥ शुचिः। बाह्यान्तर्जल
नशौचयुक्तः॥ अनिंद्याजीवकर्मा अनिन्द्यवृत्त्युपजीवी त्रिशुक्लः॥ कृशवृत्तिर्दरिद्रः॥ घृणालुर्दयापरः॥ सकुलेद्विजः॥ अनुपहतस
र्वेन्द्रियः॥ जो निर्दोषेस्त्योजनदोषेस्त्यो विमुक्तो ब्राह्मणः पात्रं। प्रतिगृहीता सो मुख्याधर्जितिसंप्रीतिनर्थिनी। दर्शने सदा। सन्तुतिस्वानुसु
जवितदासाद्धतिकीर्त्यते। सो मुख्यो मुखिप्रसादः॥ आदिशब्दात्॥ उत्साहादिग्रहः॥ एतानि लिंगानि दृश्यन्ते तत्र दासद्धास्तीति कीर्त्य
ते। तेन पात्रस्य एतानि लिंगानि सन्तीत्यर्थः॥ अपनावाधमक्लेशं स्वजन्मेनार्जितं धनं। स्वल्पं वा विपुलं वापि देयमित्यभिधीयते
अपनावाधं परपीडामंतरेणोपार्जितं। अक्लेशं पात्रक्लेशा पक्रं॥ स्वजन्मेन स्ववृत्त्या। यत्र यद्दुर्लभं द्रव्यं यस्मिन्कालेपि वा पुनः। दा
नार्हौ देशकालौ तौ स्यातां स्वेष्टेन नान्यथा। दानार्हौ दानेऽर्हौ पूजितौ प्रशस्तावितिजावत्॥ अन्यथा सुलभद्रव्यत्वेन न स्वेष्टेन
प्रशस्तावित्यर्थः॥ तत्र प्रसंगात्॥ अवस्थादीनां संप्रदर्शयन्यहीनस्यापुत्कृष्टत्वं उत्कृष्टस्यापि हीनत्वमाह। [illegible]॥ अवस्था देशका
लानां पात्रदात्रोस्तु संपदा। हीनं चापि भवेच्छ्रेष्ठं श्रेष्ठं वा प्यन्यथा भवेत्॥ अत्रान्यथेत्यवस्थादीनां असंपदा श्रेष्ठमपि दानं अन्यथा
हीनं भवेदित्यर्थः॥ दानस्य षड्विपाकत्वमाह स एव। दुष्फलं निष्फलं हीनं तुल्यं विपुलमक्षयं। षड्विपाकं समुद्दिष्टं षडेतानि विपाक
तः। विपाकः फलं॥ एतानि दानानि विपाकजे दात्पज्ञाकाना॥ क्रमेणैतेषां स्वरूपमाह। नास्तिकस्तेन हिंस्रेभ्यो जारानाजपतितापस्मृ।
पिशुनद्यूतहिंस्रेभ्यो पूर्वदत्तं दुष्फलं भवेत्। दुष्फलं विपरीतफलम्॥ महदप्यफलं दानं श्रद्धया परिवर्जितं। परबाधाकरं दानं परम
प्यनतीव्रजेत्। अफलं इष्टफलं न तु सर्वथा फलरहितं॥ अत्यंताफलत्वे तु यद्देवास श्रद्धया प्राप्नोति। तदेव वीर्यवत्तरं भवतीति तन्न व
र्घत्तु पपन्नं स्यात्॥ फलवचनं षड्विधविपाकानियानविरोधश्च स्यात्। परमपि श्रेष्ठमपि ऊनतां किंचिन्न्यूनतां तेन पू

183

श्रीः॥
१८३

१८३

घेस्मादः ॥ यथोक्तमपि यद्दत्तं वित्तेन कलुषेण तु । तन्तुसंकल्पदोषेण दानं तुल्यफलं लभते ॥ तन्तुसंकल्पदोषेणेति । देयद्रव्यलोभा
दिदोषेण ॥ यथेः पुष्करे गोः सकलेऽण्ण द्विर्द्विनीस्याद्विपुलं दत्ती ॥ अनुक्रोशवशाद्दत्तं दानमन्नं जनीव्रजेत् ॥ ॥ अनुक्रोशोदया ॥ ॥ दा
नस्य चतुःप्रकारतां ख्यमाह स एव ॥ अपानामतडागादि सर्वकालफलं ध्रुवं । आदिशब्दाद्भूम्यादिदानग्रहः ॥ सर्वकालफलं सर्वस्मिन्
दत्ते वस्त्रपयोगावच्छिन्ने कालेफलं जस्य सम्यक् तथा । तदाजन्मिकमित्याहु दीयते यद्दिने दिने । अपत्यविजयैश्वर्यस्त्रीबालार्थं यदिष्य
ते । इच्छासंस्थं तु यद्दानं काम्यमित्यभिधीयते । इच्छा अभिलाष्यस्तस्मिन्संस्थितं समाप्तिर्यस्य कर्मणः ॥ तत्तथा । क्वचिदिच्छार्थसंस्थमिति
पाठः ॥ तत्र अपत्यार्थं ज्याः पाः काम्यत्वात् । तदंगत्वात् दानमपि काम्यं ॥ कालापेक्षं क्रियापेक्षं अथापि च गुणापेक्षं तथैव च । त्रिविधानैमित्तिकं प्रोक्तं
सहोमं होमवर्जितं ॥ कालापेक्षं यत्कालविशेषपुनस्नाने विहितं । क्रियापेक्षं यन्निमित्तपुनस्नाने विहितं । अर्थापेक्षं यन्न्यायार्जि
र्जितार्थकल्पत्वबहुत्वोपादानेन विहितं । सहोमं होममन्त्रपाठवत् ॥ प्रकारान्तरेण त्रैविध्यमाह स एव । नवोत्तमानि चत्वारि मध्य
मानि विधानतः । अधमानीति शेषाणि त्रिविधत्वमिदं बुधैः । तदेव विविनक्ति ॥ अन्नं दधि मधु त्राणं गोभूरुक्माश्ववारणाः । दानान्यु
त्तमदानानि उत्तमद्रव्यदानतः ॥ त्राणं त्राणं ॥ हस्तिन इत्यनन्तरं एषामित्यध्याहारः ॥ विद्याच्छादनावासपरिभोगौषधानि च
दानानि मध्यमानीति मध्यमद्रव्यदानतः ॥ परिभोगः परिभोगसादनं शय्यासनादि ॥ उपानत्प्रेष्ययानानि छत्रपात्रासनानि
च दीपकाष्ठफलादीनि द्रव्यं च बहुवार्षिकं ॥ बहुत्वाद्यथेजातानां सर्वस्यावशेषं पुनर्ग्रहणं ॥ अधमान्यवशिष्टानि सर्वदानान्यतो विदुः ॥
अत्रापि एतेषां दानमित्यध्याहृत्य योज्यं ॥ बहुवार्षिकं पुरातनं तेनोत्तमम अपि जीर्णमयममेव विनाशपत्वमाह ॥ इष्टं दत्तमधीत

श्रीः ॥
१८४

वाविनाशजन्यजनुकीर्त्तनात् श्लाघानुशोचनात्यां चत्तगनतेजोविपद्यते ॥ तस्मादात्मकृतं पुण्यं न वृथापनिकीर्त्तयेत् ॥ तुष्कृयानि ति
ते आतुरत्वमेव कृतवादिनः ॥ श्लाघा प्रशंसा ॥ अनुशोचनं पश्चात्तापः ॥ तन्न तेज इति फलोत्पादनशक्तिहीनं ॥ वृथा न ज्ञानादिं विनोज
नेन विना ॥ तं धर्म्मकीर्त्तनं ॥ तमेव स्वधर्म्ममेव तुष्कृतानीति आहुनित्यन्वजः ॥ एवं दोष्पगुणाहीनोपादनार्थदानविशेषानुदाहृत्य
प्रकृतं शास्त्रीयं दानं स्तुवन्नुपसंहरति स एव ॥ एवं सर्वगुणोपेतमुक्तदोषविवर्ज्जितं ॥ कामदुग्धेनुवद्दानं फलत्यात्मेप्सितं फलमि
ति ॥ ॥ इति दानप्रशंसादानस्वरूपनिरूपणं ॥ ॥ अथ निषिद्धकालाः ॥ ॥ महाभारते ॥ नत्रोदानं न शंसन्ति वि
नान्मृत दृष्ट ज्ञि ॥ ॥ विष्यां कन्जीद्विजसेष्टदीपमन्नं त्र तिसजं ॥ विनेत्येतद्विद्याद्निनपिसं वध्यते ॥ ॥ स्कंदपुराणे ॥ नात्रोदान
नकर्त्तव्यं कदाचिदपि केनचित् ॥ हन्ति तिनाज्ञ सापस्मात्तस्मात् तातुर्व्वदाव है ॥ विशेषाच्च निशीथे त्र न युक्तं कर्म्म शस्यते स्मृतो विसर्ज्जो
जन्मार्जोदानादिष्वपि महानिशां ॥ आर्जं निषेधो ग्रहणादिनिमित्तकृकाम्यव्रतांगदानादिव्यतिरिक्तविषयः ॥ तदुक्तं देवलेन ॥
नाडुदर्शनसंक्रांतिविवाहोत्सववृद्धिषु ॥ स्नानं दानादिकं कुर्य्युर्न्निशि काम्यव्रतेषु च ॥ ॥ मार्कण्डेयपुराणे ॥ ॥ महानि
शान्तु विज्ञेया मध्यस्थं प्रहरद्वयं ॥ स्नानं तत्र न कुर्वीत काम्यनैमित्तिकादृते ॥ विश्वामित्रः ॥ ॥ महानिशा द्वे घटिके रात्रौ मध्य
मयामजे ॥ निमित्तिकं तदा कुर्यान्नित्यं तु न मनागपि ॥ ॥ ज्योतिर्निबन्धे ॥ ॥ अयने चापि पंच तिष्ठां च पजन्दानव्रतानि च
वेदानं तत्र पापोत्सर्गं चूडाकर्म ॥ मेखलाः ॥ मांगल्यमपि निषेधकं च मलमासे विवर्ज्जयेत् ॥ अत्र मलमासे दाननिषेधो दैनंदिनदा
नादिव्यतिरिक्तदानविषयः ॥ तदुक्तं समयनिर्णयोद्योते ॥ ॥ चंद्रप्रभपरहेचैवमन्वादि पुत्रजन्मनि मलमासेपि देयं स्या

दत्तमक्षय्यकानकमित्यादिना॥ तथा॥ बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते। मलमासइवैतानि वर्ज्जयेद्देवदर्शनम्॥ एतानि प्र
गन्प्रोष्ठ्येयादीनि। देवदर्शनं प्रथमदेवदर्शनं॥ स्कंदपुराणे॥ ऊर्द्धं प्रसूता गौर्दद्यात्सुकालापविचारणम्। कालः सर्व्व एव गुणोय दास्य
द्विमुखीति गोः॥ व्यासः॥ आसन्नमृत्युना देया अप्रोसवत्सा तु पूर्व्ववत्। तद्दत्ता वे तु गौनेवनन कोध्वन ताज वै। तदाय दिनशाक्रोति पाप्तु वेत
नीतीतु गौ। शाक्रोन्योऽत्र क्रदादत्त्वा से प्तो दद्यान्मृतस्य तु। अनुयोग न इति॥ वाराहपुराणे॥ व्यतीपाताऽतोथ संक्रांतिस्तथैव ग्रहणे। निवे।
पुण्यकालस्सदा सर्व्वं यदा मृत्युरुपस्थितः। न दानोत्पूर्वाह्निन्यादिदक्षमक्षय्यतामियान्। विष्णुधर्मोत्तरे॥ नहि कालं प्रतीक्षेत जलं
दातुं तृष्णान्वित अन्नोदकं सदा देयमित्याह भगवान्मनुः। तथा। कालः सर्व्वोऽपि निर्दिष्टः पात्रं सर्व्वमुदाहृतं। अन्नस्य प्रदाने तु नात्र
कार्य्यं विचारणा॥ तदेव दानकालस्तु यदान्यमुपस्थितं। सर्व्वं पात्रमित्यत्र सर्व्वशब्देन योनादिव्यतिरिक्तं व्यवस्थितं। योनेत्याद्यप
यं दत्त्वा दातापि नरकं व्रजेदित्यादिना योनादेन्नदानं निषेधात्॥ मत्स्यपुराणे॥ यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितं। तदैव दा
नकालस्यायतो नित्यं हि जीवितं॥ ॥इति कालाख्यदानाङ्गनिरूपणं॥ ॥अथ दानविधिः॥ ॥तत्र दानविशेष्येणुत्र निय
विशेष्येति कर्त्तव्यता तत्र॥ दानप्रकरणोस्पष्टीकरिष्यते॥ सामान्येतिकर्त्तव्यतानुप्रदश्यते॥ तत्रापस्तम्बः॥ देशतः कालतः शौचतः
सम्यक्प्रतिगृहीतृतः इति दानानि प्रतिपादयति। देशतो गङ्गादौ। कालतो ग्रहणादौ। सोचवस्नानादिना शुद्धो प्रतिगृहीतृतः गु
णे पात्रे। सम्यक्प्रतिपादयति शास्त्रोक्तविधिना दद्यादित्यर्थः॥ मनुः॥ योर्च्चितं प्रतिगृह्णाति ददात्यर्च्चितमेव वा। तावुभौ गच्छतः
स्वर्गं नरकं तु विपर्य्यये॥ गर्गव्यासः॥ गोभूतिलहिरण्याद्यास्ववासो घृतादि नागतं देयद्रव्यं सश्रद्धासमन्वितः। शक्तितो दद्यान्नृ
यः शीलादिसम्पन्नाय ब्राह्मणायानुपकारिणे मात्सादितिन अर्च्चिताय स्वशक्तितो वाचोदकपूर्वं दद्यात्। आपस्तम्बः॥ सर्व्वाण्युदकपू

ज्यो०

घ्रोणादिदानानि यथाश्रुति विहाने विहाने यज्ञेऽन्वाहार्यदानादौ । यथाश्रुति यावद्देवसूयते । तावद्देवकुम्भोन्नोदकपूर्वं कृतादिनि
यमद्युतिस्तावत् ॥ चान्दीनः । तस्मादश्चिन वोन्नदद्यादालब्धस्य वा अवोन्यपश्चोजयाचित्वाश्रोलब्धसोदकैः पापानि नस्पृष्ट्वा । तत्र द
तृधर्म्माद्विज्ञोनविष्णुधर्म्मोत्तरे ॥ सम्यक्कृतसाधनं कर्म्म कर्त्तव्यमधिकारिणा ॥ निःकामेन महावीर कामं कामान्वितेन च ॥ आचा
न्यायुक्तः सद्भाववान् वेदज्ञोऽध्यात्मवित्तमः ॥ कर्म्म ॥ फलमाप्नोति न्यायार्जितधनः स्वयं शसम्यक्कृतरूपकल्पादिना ॥ स साधनं
यथाविहितसाधनं आधिकारिणि ॥ अर्थिनामसमर्थेन विद्युत्याच । अध्यात्मवित्तमः शास्त्रोक्तफलं परलोके ममतेति विद्यतीति
धनज्ञानवान् । न्यायार्जितधनः स्ववृत्त्यार्जितधनः ॥ कात्यायनः ॥ आत्मा पुत्रः सुतो याश्चत्वारो ता पत्नी सप्यास्तथा । यात्रायां
धर्म्मकार्ये तु जायन्ते प्रतिहस्तकाः ॥ एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ॥ आपस्तम्बः ॥ पुत्रोजयितानुमन्ता कर्तेति स्वर्गो
नाकफलेष्वनुत्यागिनः ॥ योत्तूयन्नान तत्तेतस्मिन्फलविशेषः ॥ मनुः ॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्तते । नसांपरायि
कंतस्य दुर्मतेर्विद्यते फलं ॥ सांपरायिकं पारलौकिकं ॥ जाबालः ॥ विधिदृष्टं तु यत्कर्म्म करोत्यविधिनानुयः ॥ फलं
न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत् । जाबालवचनं ॥ श्रद्धाविधिसमायुक्तं कर्म्म यत्क्रियते नृभिः । सुविशुद्धेन भावेन
तदानन्त्याय कल्पते । विधिहीनं तथा दुष्टं कृतमसद्भावयत् । तद्भजन्त्यसुरास्तस्य मूढस्याकृतात्मनः ॥ भविष्योत्तरे
काम्यो दानविधिः पार्थ क्रियमाणो यथाविधि । फलप्रामुनिभिः प्रोक्तो विपरीतोऽनर्थावहः ॥ नामाख्या ॥ नावज्ञया प्रदातव्यं
किंचिद्वा केनचित्क्वचित् । अवज्ञया हि तद्दत्तं दातुस्तद्दोषमावहेत् ॥ शिवधर्मोत्तरे । प्रत्याख्यानमपि श्रेयः श्रियानावानुपेशलं ॥
न तु दानमसत्कारं पारुष्यमलिनीकृतं । वरं न दत्तमर्थिभ्यः सक्रुद्धेनीतनात्मना ॥ न तद्दानं न तत्प्रीतिं धर्म्मापि यदि वर्जितं
दानं व्रतानि नियमाज्ञानं ध्यानं हुतं तपः । जप्तेनापि कृतं सर्वं क्रोधनस्य वृथा भवेत् ॥ देवीपुराणे ॥ श्रुत्वा विनातावपूतेन न जानि

श्री॥
१८५

185

सत्यव्रतादिना॥ अपि सर्पपमात्रं हि दातारं तारयेदिह॥ शातातपः॥ अतिगम्यस्तु यद्धर्मे यज्ञदानमयाचितं॥ विद्यते सागरस्यांतस्तस्यान्तो
नैव विद्यते॥ प्रच्छन्नानि च दानानि ज्ञानं च निरहंकृतं॥ तपो विशेषाः सर्वेषु प्राणिनित्याफलमनन्तकं॥ शातातपः॥ आशां कृत्वा तु यद्दातानं दानकं
ले निषेधकं दत्त्वा संतप्यते यत्स्तुतमाहुर्ब्रह्मघातकं॥ तथा॥ काले लोभेन यन्नार्थं दद्याद्वान्ही याधः प्रतिग्रहं॥ दातारमेनं नर्के पातितं ब्राह्मणं॥
सहनन्तरं ब्रह्मघ्नोक्तं॥ गुप्ताजी गुप्तदाता च गुप्तपूजानि संयुक्तः॥ पूज्यते सर्वलोकेषु स्वर्गे देवैः शतक्रतुः॥ गरुडपुराण॥ देवेवापित्रे
कार्येवानाशुचिः कर्तुमर्हसि॥ स्नानमेव द्विजातीनां परं शुद्धिकरं मतं॥ अतः स्नातोऽर्हतामेति दानेनैव प्रतिग्रहे॥ कृतमस्नात्विनाकुर्म्म
नात्सत्वाय कल्पते॥ प्रजापतिः॥ कर्म्म गुप्तोपपवित्रमस्पृश्यतु सा॥ न न्नोद्धमेतत्पत्नमं मुनिभिः कल्पितं महत्॥ तस्मात्स्नातेनाग्नौ जीव द
ताप्रतिग्रहता॥ स्नानहोमजपादीनि कुर्वता च विशेषतः॥ पवित्रं दत्तपवित्रम्॥ वायुपुराण॥ द्विजो यः कुरुते मोहाद्दनाचस्पृहनास्ति
कः सर्वं तितु दृष्यातस्य जाः सर्वान्नसंशयः॥ तथा॥ दानप्रतिग्रहो होमाद्भोजनं बलिनैव च॥ काले णिदानादीनि विशेषतः॥ श्रीतद्धानुवि
धेयानितद्धदा चमनेनयं॥ सांख्यायनः॥ दानमाचमनं होमं भोजनं देवतार्चनं॥ प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्॥
आसनारूढपादस्तु जान्वोर्वा जंघयोस्तथा॥ कृतावसक्थिको यश्च प्रौढपादः स उच्यते॥ ब्रह्माण्डपुराण॥ नाधिकानी मुक्तक
च्छो मुक्तचूडस्तथैव च॥ दानप्रतिगृह्ययन्ते ब्रह्मयज्ञादिकर्मसु॥ देवाः समेत्य वस्त्रं हि त्वचं पुंसामकल्पयन्॥ ततस्त्ववाससा हीनमसं
पूर्णाश्च वज्जते॥ सोत्तरीयस्ततः कुर्यात्सर्वकर्म्माणि तावितः॥ अधोतेकान्तुधोते च पवित्रे दद्यान्न वाससी॥ दानं प्रतिग्रहं स्व दद्यादेहत
मेव च॥ दद्याद्धान जेत्॥ आर्द्रवासास्तु यः कुर्याज्जपहोमप्रतिग्रहं॥ सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतं॥ वसिष्ठः॥ जलजले शुष्क
वस्त्रेस्थले वैवाद्रवासस्ताजपहोमस्तथादानं तत्सर्वं निःफलं स्तवन्॥ विष्णुपुराण॥ मोहाद्देवार्चनाद्याः शुष्क्रियाः स्वाचमने तथा॥ निक
वस्त्रः प्रवर्ततां द्विजावाचनकेजपे॥ द्विजवाचनकेजपेद्विजस्वस्ति वचनादौ॥ शातातपः॥ सप्यादं शात्पनित्रयकरि दशघ्नतां चनः॥ एक

जे०

186

श्रीः॥
१८६

वस्त्रंतु तं विंधाद्दैवे पित्र्ये विवर्ज्जयेत्॥ श्लोकगोतमः॥ स्नाने दाने जपे होमे दैवे पित्र्ये च कर्म्मणि॥ वध्वी यान्नासुनीकन्जांशेषकाले यथानुवि
स्नासुनीकन्जामाहयाः सवर्णजः॥ पतिधानादवहिः कन्जानिवध्वा यासुनीपवित्र॥ धर्मे कर्म्म॥ विवद्धिः वर्जेनीयाग्रजलतः॥ वहिः कन्जाव
हिर्न्निर्गताकन्जा॥ वाराहपुराणे॥ सुस्नातः सम्यगाचान्तः कृतसंध्यादिकक्रियाः॥ कामक्रोधविहीनश्च पाषंडस्पर्शवर्जितः॥ जितेंद्रियः स
त्यवादी पात्रंदाता वसस्पते॥ श्रीगिनाः॥ संध्यायोनुत्तयोजोज्येत्ताजने दन्तधावने॥ पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः॥ गुरूणां सन्निधौ
दाने स्वाध्याये पितृतर्पणे॥ स्नानेतु मैथुने चैव योगे चैव विशेषतः॥ एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः॥ ॥कात्यायनः॥ कुशपा
णिनि विष्टेन तथा यज्ञोपवीतिना॥ देयंप्रतिगृहीतव्यमन्यथा निःफलं तु वै॥ गोतमः॥ अंतर्जानुकरं कृत्वा सलिलं सकुशोदकं॥ फलान्वि
तं वसंध्या जघ्रदधास्न द्रव्यान्वितः॥ संघाजे तिष्ठमुक कामङ्गतिफलं निर्दिश्य कृत्वा॥ पद्दिशनमाने॥ नाम गोत्रे समुच्चार्य प्राङ्मुखोदङ्मु
खेनातु॥ उदङ्मुखाय विप्राय दद्यात् स्वस्तिवाचनेन॥ दिग्कीर्त्तनादि ति दद्यस्य सदेवताकस्य कीर्त्तनानन्तरं दद्यादित्यर्थः॥ अर्जिदिग्नि
जमः प्राङ्मुखादिनृपः कन्यादानादि निष्क्रदानविप्रयजः॥ कन्यादाने तु॥ प्राक्स्वत्यगास्यतोदीर्ध्वहिदानं गाहक जो स्थिति नितिसन्त्य
त्ते॥ विशेषान्निधानात्॥ पात्रासन्निधाने नानदेनर्विशेषः कुङ्कः॥ मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत्॥ विद्यते सागर
स्यांतस्तस्यान्तोनैव विद्यते॥ पद्दिशनमाने॥ पात्रं मनसि संविन्यस्य क्रियावन्तं गुणान्विते॥ देशकालेनु संप्राप्ते देयमम्बु विनिक्षिपेत्॥
उपपन्नासन्निधाने तु विशेषस्तत्रोक्तः॥ द्रव्यपात्र विशेषस्वेतरपनोज्जं दातुमर्हति॥ यज्ञाय पाद्येन वै पात्रे द्रव्यमादि त्यदेवतो॥
धौम्यः॥ पनोज्जे पितु प्रदत्तं तीर्थस्नानेन सोदकं॥ तद्दाने सोदकं प्राहुरनन्तफलदायकं॥ तथा॥ पनोज्जेकल्पितं दानं पात्रात्ता
वे कथं त्तवेत्॥ गोत्रजेत्स्य तथा दद्यात् दत्वा वेस्य बंधुषु॥ पनोज्जे पित्रप्रदत्तं नाव पूर्ण निवेतसा॥ गुरुमित्र द्विजातिस्य तलतु दान
मनन्तकं॥ पनोज्जे प्रलुप्रदत्तं स्वत्वस्यजत विवर्जितं॥ दृश्यते सागरस्यांतस्तस्यान्तो नैव दृश्यते॥ जातूकर्ण्यः॥ ऐकाने पादद्यात्स्व

१८६

तिगृह्णीयाच्च ॥ स्कंदपुराणे ॥ तस्मात्स्नात्वा समुच्चार्य कार्यौ दानप्रतिग्रहौ ॥ व्यासः ॥ त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वदा ॥ तिस्रः सार्द्धास्तु कर्तव्या
मात्रास्तत्र विचक्षणैः ॥ देवताध्यानकाले तु प्रकृतं कुर्यान्नसंशयः ॥ तथा ॥ दानहोमजपान्कुर्यान्नासीनः कुशसंस्तरे ॥ एष्वेव फलमनन्तं तु लभेत्तत्र
प्रमुखो नरः ॥ रुद्रवसिष्ठः ॥ नामगोत्रे समुच्चार्य सम्प्रदानस्य चान्वितो दद्यात् संकीर्त्य देशकालादि तुभ्यं संप्रददे इति ॥ मम मेति स्वसत्त्वनिवृत्ति
मपि कीर्तयेत् ॥ मत्स्यपुराणे ॥ न विनैव विधानेन ऊहे हेमसंप्रेक्षितं बुधः ॥ तिष्ठद्द्रूपावृहंपसाध्योकव्याधिकनंन्दणि ॥ शीघ्रं पत्नस्वीकरण ॥
घूपः प्राप्नोति पुष्कलं हि मेत्सुपलनगि ॥ संप्रोक्षितमिति ॥ पात्रे देशे नो तत्पृष्ठमित्यर्थः ॥ षड्त्रिंशन्मते ॥ प्राणीयमसु समिधेग्नौ जुहुयाज्जाह्न
तित्रयं ॥ उदगमेषु दत्तेषु पात्रं नेषु उपपादयेत् ॥ आगमनेषु स्वयं स्थित्वा दाता च पूर्वमेश्वनमः ॥ ध्यात्वा स्वपुण्यमुद्दिश्य दक्षिणां प्रतिपादयेत् ॥ सम
स्ताव्याहृती हुत्वा ततो पविसमापयेत् ॥ आलगांध्रणिपत्नाथ ततः पात्रं विसर्जयेत् ॥ अनेन विधिना दानं दातव्यं होमपूर्वकं ॥ तत्कर्म दक्षि
णावर्ज्यं होमवर्ज्यं च नाहंति ॥ एतच्च विहितांगहोमकेषु दानेषु होमानुवादो दर्शितः ॥ अन्यथा हस्तयाद्दष्टृशिष्टाचाराने पुत्तां वूलादिदानेषु
प्रसंगः स्यात् ॥ व्यासः ॥ सद्यः पुष्कलं सुविर्द्धन्ता दानं दद्यात्सदक्षिणं ॥ अदक्षिणं तु यद्दानं तत्सर्वं निःफलं भवेत् ॥ दक्षिणात्तिनु पतीहि कर्म
सिध्यति मानवे ॥ सुवर्णमेव सर्वासु दक्षिणासु विधीयते ॥ सर्वपदमात्रविशेष्य विहितदक्षिणोतनयनम् ॥ ॥ अथ प्रतिग्रहीतृकृत्य
म् ॥ ॥ विश्वामित्रः ॥ अत्यर्चितस्वधर्मज्ञः स्वथा वद्धशिखो द्विजः ॥ स्नातः सम्यगुपस्पृश्य गृह्णीयात्प्रयतः शुचिः ॥ ॥ आदित्यपुरा
णे ॥ ॥ ॐकारमुच्चरन्प्राज्ञो द्रव्याणां सकुशोदकं ॥ गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्तयेत् ॥ विष्णुधर्मोत्तरे ॥ प्रतिगृहीता सावित्रीं
सर्वत्रैवानुकीर्तयेत् ॥ ततस्तु कीर्तयेत्सार्द्धं द्रव्येसाद्रव्यदेवताम् ॥ समापयेत्ततः पश्चात्कामस्तुत्याप्रतिग्रहं ॥ तदन्ते कीर्तयेत्स्वस्ति प्रति
ग्रहविधिस्त्वयं ॥ सावित्रं सवितृदेवत्यं यजुः देवस्यत्वेत्यादि प्रसिद्धं ॥ ततो द्रव्य ॥ सार्द्धं द्रव्य देवतामिति यत्स्यद्रव्यस्य या देवता तेन
द्रव्येन देवतासंबंधः कार्यः ॥ तत्र चायं प्रकारः ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अमुकं सदैवतं इदमहमुकर्मा

ज्यो०

187

सं॰॥

१८७

प्रतिगृह्णामि कोदात् ॥ कस्मा अदात् कामोदात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ ॐ स्वस्ति ॥ दक्षिणामाहरोत्तु सा
वित्रमंत्रान्नतन्नाजोत्वावनु ॥ ॥ जपन्तु देवि दक्षि ॥ ॥ अमुकस्मै अमुकी तेनामन्त्रम्मस्यामा [illegible] मजोमध्यमस्तु प्रतिग्रहीत्रे ततः क
मस्तुतिः ॐ स्वस्तीति अत्र विशेषम् आदित्यपुराणे ॥ प्रतिग्रहे पठेद्युक्तः प्रतिगृह्य द्विजोत्तमान् ॥ मंत्रं पठेत्तु राजन्य उपांशु च तथा विशि ॥ म
नसा तु तथा शूद्रे स्वस्ति वाचनमेव च ॥ सौकाने ब्रह्म ॥ ॥ कुर्यान्नित्यं नौकानां महीपतौ ॥ उपांशु च तथा वैश्ये मनसा स्वस्ति शूद्रजे ॥ प्रतिग्रहे
प्रतिग्रहमंत्रं मंत्रं मध्यमेश्वरौ ब्राह्म ॥ ॥ दातनि सौकानां स्वस्ति वा सूनं कुर्यात् ॥ ब्रह्माण्डपुराणे ॥ शुचिः पवित्रपाणिश्च गृह्णीयाद्कुत्रामुष्णः ॥
अनीष्टदेवतीध्यायन् मनसा विजितं द्विजः ॥ कृतोन्नतीजको नित्यं स्वतेजोनुकनस्तथा ॥ दातुर्निक्षमपि ध्यायन् प्रतिगृह्णीयाद्ललोलुपः ॥
वाचायनः ॥ कोप्याजवासाः कुर्वते जपहोमप्रतिग्रहान् ॥ नतं देवगमं त बुतिह्व्यकव्यास्वधावहिः ॥ [illegible] गालवः ॥ हस्तमध्ये ब्रह्मतीर्थे
दक्षिणामाहरोत्तु नन् ॥ प्रचेताः ॥ दक्षिणा ॥ ॥ हस्तमध्ये ब्राह्म ॥ ॥ अस्याग्नेयं तीर्थमाग्नेयेन प्रतिगृह्णीयादिति ॥ ॥ गरुडपुराणे ॥ स्नातः सम्प
गुपस्पृश्य पदधानो धौतवाससी सपवित्रकरश्चैव प्रतिगृह्णीत धर्मवित् ॥ विष्णुधर्मोत्तरे ॥ मृतके सूतके विप्रान्तु माध्यः प्रतिग्रहे
तत्रापि च तथा गनाध्यानने नत्तपदक्षि ॥ ॥ कालः स्वर्गहारो जपदात्तपमुपस्थितं ॥ प्रतिग्रहास्तथान्ये तु माध्याना शुचिना द्विजाः ॥ अ
त्यक्तेन च धर्मज्ञास्तथा मुक्तशिखेन च ॥ विष्णुधर्मोत्तरे ॥ दातुर्मैत्रप्रयोगान्ते अमुकस्मै सुनाजवै ॥ इदमौ प्रतिगृह्णामि तदन्ते स्वस्ति
कीर्तयेत् ॥ कन्यादाने तु न पठेन्द्रव्या ॥ ॥ तु पृथक् पृथक् ॥ प्रतिग्रहे द्विजः श्रेष्ठास्तत्रैवानतं तेवन्निते ॥ कन्याप्रदाने इति कन्यादाना
वसनदीप्नुमानानां सुवर्णादास्यादि द्रव्याणां द्रव्यदेवतासंबंधे पृथक् पृथङ् मन कीर्तयेत् ॥ जनुलेक कन्यादानरवान्तजेवंतीत्यर्थः ॥ प्रतिग्रह
स्यप्येषा धर्मं न जानाति द्विजो विधिं ॥ न चरतेन्ज समाधुक्ताननकैः प्रतिपद्यते ॥ विधिस्तु धर्मः वि[illegible]प्राप्त ॥ ॥ तु प्रतिग्रहे ॥ दाता सह तनप
वमहादुर्गोपसो घुर्वीतस्माद् दृष्ट्वा विधिं कृत्वा ब्राह्म ॥ ॥ पुत्र प्रतिग्रहे [illegible] जनस्तजागं कुर्याद्दातुस्तथैव च ॥ तस्मात्सर्वप्रयत्नेन

१८७

विधिज्ञोजःप्रतिग्रहे।तथाभूमेःप्रतिग्रहंकुर्वाणोभूमिंकुर्वेत्प्रदक्षिणां।कन्यांगृह्णीत्वाकन्यांतुदासदास्यौद्विजोत्तमाः।कन्नंतुहृदिविन्यस्य
धर्म्मीजपःप्रतिग्रहे।प्रतिग्रहेतुस्वीकारः॥आनुष्टुभंतुगजस्योक्तंकार्त्तिकाश्वस्यकीर्त्तितः।तथाचैकशफानांतुसर्वेषांचाविशेषतः।
प्रतिगृह्णीतज्ञानंदृष्ट्वापुच्छेहृष्टाजिनंतथा।सामान्यैकशफानांतुकार्त्तिकःप्रतिग्रहः।येत्वेकशफाःकल्माषागोराःतान्विशेषतः।
शृंगेप्रतिगृह्णीतनत्वयः।अपनेतु।कौलेयंचस्वकंसर्वंगाढंपुच्छेविचक्षणः।गृह्णीयान्माहिष्यंशृंगेस्वनंचैवप्रदेशतः।प्रतिग्रहमथो
घ्रस्यपात्राणांवाघिनोहस्तात्।मूर्वीज्ञानांमुष्टिमादायजलान्यादायसर्घतः।वस्त्रंस्पर्शिततादघात्पतिधायायवापुनः।आनुष्टुपानहै।
मंत्रमानुष्टुभंचैवपादुके।चर्मध्वजोचर्मसंस्पृश्याप्रविशयचतथागृह्णीं।अवतीर्यचसर्व्वाणिजलस्थानिचवैद्विजाः।ईशान्योतुनथोब्रा
ह्यःछत्रंदंडंतथैवच।कुमारीस्वप्रतिगृह्णीयात्ज्ञानमूलंन्यस्तकरोद्विजः।आनुष्टानिसमादायतथामुख्यवितृष्णातामृ।ईशान्यांदिशिआग्ने
यामुच्यमानाबध्नीत्यर्थः।पतिरिशिष्टो।प्रतिगृह्णीतगांपुच्छेकर्णेवाहस्तिनंकरे।मूर्द्धिदासीमजंचैववपृष्ठेस्वतनगर्दनो।अश्वंकर्णेशिरेवापि
अन्नमुद्दिश्यजपानजेत्।राज्ञासनंगृह्णीवैसंस्पृश्यपादौपादुकेवनौउष्ट्रंचककुदेस्पृष्ट्वामहिषीमस्महिष्यादिकान्।गोयामश्वविधानेन
पुष्पेसंस्पृश्यपत्रिणः।दृष्ट्वाताद्दंशिनश्वेवतथान्युद्रव्याणिस्पर्शेतुजस्विनांवुसत्वानामेष्यएवविधिःस्मृतः॥ ॥इतिप्रतिग्रहविधिक
त्पम्॥ ॥अथदैव्यद्रव्यदेवताः॥ ॥विष्णुधर्मोत्तरे॥अनंतरंसर्व्वदेवत्यंचूमिद्वैविष्णुदेवताः।कन्यादासस्तथादासीप्राजा
पत्याःप्रकीर्त्तिताः।प्राजापत्योगजःप्रोक्तःअश्वंतुनंगोऽयमदेवताः।तथाचैकशफंसर्वंकथितंयमदैवतं।महिष्यश्चतथायाम्यउष्ट्राचैवनै
ऋतोलवेत्।रौद्रीधेनुविनिर्दिष्टाछागमाग्नेयमुच्यते।मेषंतुवारुणंविद्यात्वाहनाहोदैवप्रवःस्मृतः।आरण्याःपशवःसर्वेकथिता
वायुदेवताः।जलाशयानिसर्व्वाणिवारिधानीकमंडलुः।कुंभश्चकरकश्चैववारुणानिनिर्दिशेत्।समुद्रजानिरत्नानिसामुद्र।

करंस्कंधे इति
स्पर्शः।७

जे०

188

श्रीः॥

१८८

॥तथैव च॥ आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथा॥ प्राजापत्यानि सस्यानि पक्वान्नमपि च द्विजाः॥ ज्येष्ठानि सर्वगंधानि गंधद्रव्यो॥
विचज्ञाः॥ वार्हस्पत्यं स्मृतं वासः सौम्यानि पयसानि च॥ पुंसि॥ स्वनथा सर्ववाद्याः प्रकीर्तिताः॥ विधात्राली विनिर्दिष्टा विद्यो प
करणानि चासनस्थानानि ज्येष्ठानि पुस्तकाद्यानि पीडितेः सर्वाणि शिल्पितानि विश्वकर्मा तु देवतम्॥ कुमाराणामथ पुष्पाणि शाकानि हवि
तैः सह॥ फलानामपि सर्वेषां तथान्ये यो वनस्पतिः॥ मत्स्यमांसे विनिर्दिष्टे प्राजापत्यं तथैव च॥ छत्रं कृष्णाजिनं शय्या नाथमासनमेव
च॥ उपानहौ तथा यानं जन्मवानत्वाता वर्जितं॥ उत्तानांगिनः सत्वे तत्र तिग्मं हीतमानवः॥ पर्जन्यापत्तथा सीतं शस्त्रं चर्मध्वजादिकं॥
यानं पक्वं नासर्वं कथितं शक्रदेवतं॥ यन्ह तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः॥ तन्नूनं विष्णुदैवत्यं सर्वं वा विष्णुदेवतं॥ तदेतद्दैवतानां प
याजयममुकदेवतमिति द्रव्यविशेषणा॥ अनेन पानवाक्येन नियानं शिष्टाचारात्॥ ॥इति द्रव्यदेवतानि॥ ॥इति श्रीजैमनप्र
काशे दानविधिद्रव्यदेवतासमाप्तः॥ ॥अथ देयद्रव्यविशेषमानं॥ ॥तत्रादित्यपुराणे॥ जालान्तरगते भानौ यत्सूक्ष्मं
दृश्यते रजः॥ प्रथमं तत्प्रमाणानां त्रसरेणुः प्रचक्षते॥ त्रसरेणुश्च विज्ञेयो अष्टौ ये परमाणवः॥ त्रसरेणुस्तु ते ह्यष्टौ रथरेणुस्तु संस्मृतः॥
रथरेणुस्तु ते ह्यष्टौ वालाग्रं तत्स्मृतं बुधैः॥ वालाग्राण्यष्ट लिक्षा तु यूका लिक्षाष्टकं बुधैः॥ अष्टौ यूका यवः प्रोक्ता ह्यंगुलं तु यवाष्टकं॥
द्वादशांगुलमात्रो वै वितस्तिः सम्प्रकीर्तितः॥ अंगुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते॥ तालः स्मृतो मध्यमया गोकर्णश्चाप्यनामया॥
कनिष्ठया वितस्तिस्तु द्वादशांगुलिकः स्मृतः॥ रत्निरंगुलपर्वाणि विज्ञेयस्त्वेकविंशतिः॥ चत्वारि विंशतिश्चैव हस्तः स्यादंगुलानि तु॥
किष्कुः स्मृतो द्विरत्निस्तु द्विचत्वारिंशदंगुलः॥ षण्णवत्यंगुलश्चैव धनुर्दंडः प्रकीर्तितः॥ धनुर्द्वाभ्यां युगं नालिर्नाडिका हस्तपंचांगुलैः॥ धनुष्या
तैः शतैर्नल्वमाहुः सैर्ख्याविदो जनाः॥ धनुःसहस्रे द्वे चापि गव्यूतिरुपदिश्यते॥ अष्टौ धनुःसहस्राणि योजनं तु प्रकीर्तितम्॥
मागधोऽध्यक्षः॥ ॥पलमानं तु परं सूक्ष्मं त्रसरेणुं महीभुजः॥ वालाग्रं वै लिख्या च यूका वार्थयवांगुली॥ क्रमादष्टगुणान्याहुर्जवान्

१८८

रातततोंगुली। षडंगुलीपदं त्वाहुर्वितस्तिर्द्विगुणाः स्मृतः। द्विवितस्तिस्ततो हस्तो ब्रह्मतीर्थादिवेष्टनात्। चतुर्हस्तो धनुर्दंडो नालिकातयुगं न
तु। क्रोशो धनुःसहस्रे द्वे गव्यूतिस्तच्चतुर्गुणम्। द्विगुणं योजनं तस्मात्प्रोक्तं संख्यानकोविदैः। बृहस्पतिः॥ दशहस्तेन दंडेन त्रिंशद्दंडा निवर्तनी
दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति च॥ ॥वसिष्ठः॥ दशहस्तेन वंशेन दश वंशान्समंततः। पंच चाभ्यधिकान्दद्यादेतद्गोचर्म चोच्यते॥ ॥
विष्णुधर्मोत्तरे॥ ॥यदुत्पन्नमथाह्नाति ननः संवत्सरं द्विजः। एवं गोचर्ममात्रं च स्तुवः प्रोक्तं विचक्षणैः॥ मत्स्यपुराणे॥ ॥दंडेन सप्तहस्तेन
त्रिंशद्दंडा निवर्तनं। तत्रागहीनं गोचर्ममानमाह प्रजापतिः। ॥वृद्धवसिष्ठः॥ गवां शतं वृषश्चैको यत्र तिष्ठेदयंत्रितः। एतद्गोचर्ममा
त्रं तु प्राहुर्वेदविदो जनाः॥ ॥ब्रह्मपुराणे॥ ॥धर्मशास्त्रेषु मानार्थं याः संज्ञा मुनिभिः स्मृताः। ताः सर्वा व्यवहारार्थं वोढव्याः सर्वदा
जनैः॥ ॥इति तन्मिदानं॥ ॥अथ सुवर्णमानं॥ ॥याज्ञवल्क्यः॥ ॥जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतः। तेऽष्टौ लि
क्षा तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः। कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वा
रः पंच वापि प्रकीर्तितम्। ते त्रयः कृष्णल इत्यादि। ते मध्ययवास्त्रयः कृष्णलः। कृष्णलो गुंजा। ते कृष्णलाः पंच माषः। ते माषाः षोड
श सुवर्णः। चत्वारः सुवर्णाः पलं। पंच वा सुवर्णाः पलं। सुवर्णपंचकेन पलमानान्नियानमात्र विषये। अंगिराप्रोक्तेपि। जवस्यार्ध्य
पैः षड्भिर्गुंजा जवस्यात्त्रिभिर्जवैः। गुंजाभिः पंचभिस्त्वेको माषकः परिकीर्तितः। तत्षोडशभिर्माषैः सुवर्णो हेम पुनः स्मृतः। चतुर्भिः पल
मेतस्याद्धरणो धारणं विदुः। दशपलानि धरणामित्यमरेशे तथा॥ मनुः॥ पलं सुवर्णाश्चत्वारः पलानि धरणं दश॥ प्रकारान्तरेणाप्या
ह। सुश्रुते तु यथावन्मध्यपाककाले निष्पन्ना धान्यमाषा दश सुवर्णमाषः पंच वा गुंजाः॥ सुवर्णमाषः ते षोडश सुवर्णः। एवं प्रमाण
सिद्धस्य सुवर्णस्य द्वितीया संज्ञा कर्ष इति। चतुःकर्षं पलं। पलानां शतेन तुला। विंशतितोलिकोत्तानः प्रसेककमानस्य रुद्रितो लिक इति
द्वितीया संज्ञा॥ ब्रह्मप्रोक्ते॥ फलानि विंशतिर्वीसी पंचवीशपलमनाद्दतोलिकः स एव स्याज्ज्ञानो विंशतितोलिकः स एव स्याज्ज्ञानाद्वि

जे॰

189

सी॰ ।।
१८९

शतितोलिकः॥ ॥इति हेममानं॥ ॥अथ रूप्यप्रमाणं॥ याज्ञवल्क्यः॥ ॥द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते शतमानं तु दश
भिर्धरणैः पलमेव तु। निष्कं सुवर्णाश्चत्वार इति॥ द्वे कृष्णले द्वे गुंजे पूर्वोक्ते रूप्यमाषो भवति। मध्यमयवपञ्चकपर्ने मितरूप्यको रूप्यमा
षो भवतीत्यर्थः। ते माषाः षोडश धरणं। दशभिर्धरणैश्शतमानमित्युच्यते॥ तदेव पलमिति पीकजते। चत्वारः सुवर्णा निष्कः। अत्र
न रजतप्रकरणे हेमप्रकरणे सुवर्णशब्दः पादपूर्णे हेमवचनं। क्रमाण्यप्राप्त्यर्थे अतः पञ्चकृष्णलको माषः। न कृष्णलद्वयपूर्वमि
मितः। तैः षोडशभिर्माषैर्निष्पन्नः सुवर्णो। ते सुवर्णाश्चत्वारो निष्कः। हेमप्रमाणोक्तचतुःसुवर्णसमानो मितो न रजतो निष्क इत्यर्थः॥
मनुः॥ द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः। ते षोडश स्याद्धरणं पुराणश्चैव राजतः। धरणानि दश ज्ञेयः शतमानस्तु राजतः॥
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः। समधृत इति। मध्यमयवप्रमाणोऽप्यते इत्यर्थः। अत्र च सौवर्णो निष्क इत्यपि लिखीयते। सौव
र्णो निष्कः धारादित्यादिषु तत्र हेमप्रमाणं। दृतसुवर्णाश्चतुष्टपर्णान्मितद्धेमद्रव्यमेव निष्कशब्दवाच्यं न रूप्यं॥ अथ धान्यादिपरिमाणं॥ ॥
स्कंदपुराणे॥ यवगोधूमधान्यानि तिलाः कङ्गुकुलत्थकाः। माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः। गवेधुकाश्च नीवाराः आढक्यः
सहचीनकाः। चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु॥ ॥मार्कण्डेयपुराणे॥ ॥अन्नानि तानि वीजानि ग्राम्यारण्यानि जानि
तु ओषध्यः फलपाकान्ताः शतास्सप्तदश स्मृताः। व्रीहयश्च यवाश्चैव गोधूमा अणवस्तिलाः। प्रियङ्गवः कोविदाराः कोरदूषाः सचीन
काः। माषा मुद्गा मसूराश्च निष्पावास्सकुलत्थकाः। आढक्यश्चणकाश्चैव शणाः सप्तदश स्मृताः। इत्येता ओषधीनां तु ग्राम्या जातयः
स्मृताः॥ ओषध्यो यज्ञियाश्चैव वनीवारा जर्तिलाः सगवेधुकाः। कोविदानसमा ... तथा वेणुयवास्तथा ग्राम्यारण्याः स्मृता ह्येता
ओषध्यस्तु चतुर्दश॥ ॥वाराहपुराणे॥ ॥पलद्वयं तु प्रसृतं मुष्टिरेकं पलं स्मृतं। अष्टमुष्टिर्भवेत्किञ्चित्किञ्चिदष्टौ तु पुष्कलं॥ पुष्कलानि च
त्वारि आढकः परिकीर्तितः। चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणं॥ ॥लैङ्गपुराणे॥ ॥पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं। चतु
र्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढकैस्तैश्चतुर्भिस्तु द्रोणस्तु कथितो बुधैः। कुम्भो द्रोणद्वयं सूर्पः खारी द्रोणास्तु षोडश॥

१८९

पलैव कुडवप्रस्थः आढको द्रोण एव च। धान्यमानेषु वोद्धव्याः क्रमशो मी चतुर्गुणाः। द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते। कुम्भै
स्तु दशभिः वाहो धान्यसंख्या प्रकीर्त्तिता। विंशत्या कुम्भ इति। विंशत्या द्रोणैरित्यर्थः। अत्र धान्यसंख्येतु पलज्ञः। अतएव द्रवद्रव्यविषये
पि द्विगुणा। पलद्वयन्तु प्रसृतं द्विगुणं कुडवं मतम्। चतुर्भिः कुडवैः प्रस्थः प्रस्थश्चाढकस्तैश्चतुर्गुणः। चतुर्गुणो द्रोण वेद्रोणः। इत्येतद्द्रव्यमानक्रमि
ति॥ ॥द्रोणद्वयन्तु कुम्भ इत्येकः पक्षः॥ ॥कुम्भस्यैव शूर्प इति। संज्ञान्तरं। विंशत्या द्रोणैः कुम्भ इत्यपरः॥ पलसहस्रपरिमाणः॥ कुम्भ इ
ति दानविवेके। द्वादशपलाधिकपञ्चशतपलपरिमाणः कुम्भ इत्यपरे। एते पक्षा देशकालशक्त्यपेक्षया ग्राह्याः॥ ॥त्रिकौड्रीवि
वैटोवा। मानन्तु लीगुलिन्नस्थोगुंजापंचाद्यमाषकः। तेषां षोडशाक्षः। कर्षो स्त्रीपलं कर्षचतुष्टयं। सुवर्णो विंशोहमो निष्के कुडविष्किस्तु नहेयु
ल्यपले। तुला स्त्रीपलशतं तानस्याद्विंशतिः तुलाः। आचितो दशभाराः स्युः शाकटो भार आचितः। इति धान्यमानं॥ ॥इति सीग्नि
मप्रकाशे पतिताप्रकरणं॥ ॥अथ दानविधिरुच्यते॥ ॥तत्र प्रथमतः कपिलादानविधिः॥ ॥पुण्यं दिनमथासाद्य
स्नात्वा तर्प्य पितॄंस्तथा। कृतोपवासः संश्राव्य पञ्चगव्यं निवेश्य वा। घृतजीनाग्निं कृत्वा विष्णोः शिवस्य च। समभ्यर्च्य यथान्यायं पु
ष्पादिभिरनुक्रमात्। उदङ्मुखीं ततः कृत्वा दद्याद्धेनुं पयस्विनीं। सवत्सां वस्त्रसंवीतां सितयज्ञोपवीतिनीं। सौवर्णशृंगीं रौप्यखुरीं
सुवर्णापरिसंस्थितां। कांस्यदोग्ध्रीं महाशुभ्रां ताम्रपृष्ठीं तथैव च। सितचामरपुष्पाढ्यां मुक्तालांगूलभूषितां। घण्टावस्त्रपरिच्छन्नां
घण्टारवविनादिनीं। पट्टस्रग्गन्धसंवद्धां किंकिणीजालमण्डितां। दिव्यवस्त्रसमांशुकां हिमदर्प्पणभूषितां। पयस्विनीं सुशीलां च वत
सर्वत्सकान्वितां। ईदृशीं कपिलां दद्याद्विप्राय विधानतः। शक्तितो दक्षिणां युक्तां ब्राह्मणाय महात्मने॥ ॥ततो ब्राह्मणावरणं॥
अमुकगोत्रायेत्यादि कपिलादाननिमित्तं एभिश्चन्दनपत्राक्षततताम्बूलपूगीफलयज्ञोपवीतवस्त्रादिभिस्त्वामहं वृणे। क्षतशाखोक्तफलप्राप्ति

जे०

कामाख्यां महिंद्रगे॥ इतोस्मीति॥ प्रति वचनी॥ अथ कपिलां गोषु देवतान्न्यसेत्॥ गोत्पो पर्व्वतैः प्रवक्ष्ये न्ते गोत्पो देवाः समुत्थिताः॥ गो त्ति र्ध्ये दिः

समुद्री सोः सप्त ऊंगप दक्रमाः॥ शृंगमूले गवान्नि त्यं ब्रह्मा विष्णु समाश्रितौ॥ शृंगाग्रे सर्वतीर्थानि स्थावरानि चरानि च॥ शिनो मध्ये महादेवः

वृषूतमप्र स्थितः॥ ललाटाग्रे स्थिता देवी नासावंशे च षण्मुखः॥ कंबलाश्वतरौ नागौ नासापुट समाश्रितौ॥ कर्णयो न श्विनौ देवौ चक्षुष्योः श

शिनाकरौ॥ दंतेषु वायवः सर्वे जिह्वायां वरुणः स्थितः॥ सरस्वती वहुंकारे यमजात्यौ च गंडयोः॥ संध्याद्वयं तथोष्ठाभ्यां ग्रीवायां मिन्द्र आ

श्रितः॥ रक्षांसि कुक्षि देशे तु साध्या श्वो न सि सं स्थिताः॥ चतुः पादेषु वै धर्मः सर्वजंघासु संस्थितः॥ खुन मध्ये तु गंधर्वाः खुनाग्रे खु च पन्नगाः॥

पुनाताग्नि च गात्रेषु गात्रे चाप्सुन रसि स्थिताः॥ उद्धार्श्वे कादशाः पृष्ठे वसवः सर्वसंधिषु॥ सोणीतटस्था पितरः सोमो लांगूलमाश्रितः॥ आदि

त्याः स्वाप्स घो वालाः पिंडीभूता व्यवस्थिताः॥ साक्षाद् गंगा च गोमूत्रे गोमये यमुना तथा॥ जीनि सनस्वती देवीन र्मदा दधि संस्थिता॥ हुताशनः स्व

धेनुः पयोधनाः॥ एतद्धि कथितं सर्वं पुनाणे क्रमप्राक्तितो॥ गवां सर्वगोषु जे देवानिवसंति हि नु निश्चिताः॥ अथ कपिलीत्रिः प्रदक्षिणी कुर्यात्॥ पृ

निर्मंत्रैः॥ उष्णमाम्रा ब्रह्मन्॥ जालक्ष्मीः सर्वभूतानां सर्व देवेष्व च स्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपोहति॥ देहस्थाया च रुद्राणी

शंकरस्य सदा प्रिया॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि जा लक्ष्मीः स्वाहा या च विभावसो॥ चंद्रार्कशक्र शक्तिर्जा धेनुरू

पा समास्तुये॥ चतुर्मुखस्य या लक्ष्मीर्लक्ष्मीर्जा धनदस्य च॥ लक्ष्मीर्जा लोकपालानां सा धेनुर्वरदा मम॥ स्वधा जा पितृमुख्यानां स्वाहा यज

दत्तभुजां च या॥ सर्वपापहरा धेनुस्तस्मा च्छान्तिं प्रयच्छमे॥ ततः संपूज्य संकल्प्यः कार्यः॥ ॥ततो गोपुच्छतर्प्पणं॥ मातृपक्षाश्च जे केचि

त्पितृपक्षकाः॥ गुरुश्वशुर बंधूनां जे कुले षु समुद्भवाः॥ जे बान्धवे लुप्तपिंडी वै पुत्र दार विवर्जिताः॥ ते सर्वे तृप्तिमायान्तु गो

पुच्छोदकतर्पणात्॥ क्रिया लोपगता जे च जात्यन्धाः पंगवस्तथा॥ विरूपा आमगर्भाश्च ज्ञाताज्ञात कुले मम॥ ते सर्वे तृप्तिमायान्तु गो

श्री॥ १९०

१९०

